श्री भास्कर स्तुतिः (युधिष्ठिर कृतं)

श्री भास्कर स्तुतिः (युधिष्ठिर कृतं)

त्वं भानो जगतश्चक्षुस्त्वमात्मा सर्वदेहिनां |
त्वं योनिः सर्वभूतानां त्वमाचारः क्रियावतां || 1 ||

त्वं गतिः सर्वसांख्यानां योगिनां त्वं परायणं |
अनावृतार्गलद्वारं त्वं गतिस्त्वं मुमुक्षतां || 2 ||

त्वया संधार्यते लोकस्त्वया लोकः प्रकाश्यते |
त्वया पवित्रीक्रियते निर्व्याजं पाल्यते त्वया || 3 ||

त्वामुपस्थाय काले तु ब्राह्मणा वेदपारगाः |
स्वशाखाविहितैर्मंत्रैरर्चंत्यृषिगणार्चितं || 4 ||

तव दिव्यं रथं यांतमनुयांति वरार्थिनः |
सिद्धचारणगंधर्वा यक्षगुह्यकपन्नगाः || 5 ||

त्रयस्त्रिंशच्च वै देवास्तथा वैमानिका गणाः |
सोपेंद्राः समहेंद्राश्च त्वामिष्ट्वा सिद्धिमागताः || 6 ||

उपयांत्यर्चयित्वा तु त्वां वै प्राप्तमनोरथाः |
दिव्यमंदारमालाभिस्तूर्णं विद्याधरोत्तमाः || 7 ||

गुह्याः पितृगणाः सप्त ये दिव्या ये च मानुषाः |
ते पूजयित्वा त्वामेव गच्छंत्याशु प्रधानतां || 8 ||

वसवो मरुतो रुद्रा ये च साध्या मरीचिपाः |
वालखिल्यादयः सिद्धाः श्रेष्ठत्वं प्राणिनां गताः || 9 ||

सब्रह्मकेषु लोकेषु सप्तस्वप्यखिलेषु च |
न तद्भूतमहं मन्ये यदर्कादतिरिच्यते || 10 ||

संति चान्यानि सत्त्वानि वीर्यवंति महांति च |
न तु तेषां तथा दीप्तिः प्रभावो वा यथा तव || 11 ||

ज्योतींषि त्वयि सर्वाणि त्वं सर्वज्योतिषां पतिः |
त्वयि सत्यं च सत्त्वं च सर्वेभावाश्च सात्त्विकाः || 12 ||

त्वत्तेजसा कृतं चक्रं सुनाभं विश्वकर्मणा |
देवारीणां मदो येन नाशितः शार्ङ्गधन्वना || 13 ||

त्वमादायांशुभिस्तेजो निदाघे सर्वदेहिनां |
सर्वौषधिरसानां च पुनर्वर्षासु मुंचसि || 14 ||

तपंत्यन्ये दहंत्यन्ये गर्जंत्यन्ये तथा घनाः |
विद्योतंते प्रवर्षंति तव प्रावृषि रश्मयः || 15 ||

न तथा सुखयत्यग्निर्न प्रावारा न कंबलाः |
शीतवातार्दितं लोकं यथा तव मरीचयः || 16 ||

त्रयोदशद्वीपवतीं गोभिर्भासयसे महीं |
त्रयाणामपि लोकानां हितायैकः प्रवर्तसे || 17 ||

तव यद्युदयो न स्यादंधं जगदिदं भवेत् |
न च धर्मार्थकामेषु प्रवर्तेरन्मनीषिणः || 18 ||

आधानपशुबंधेष्टिमंत्रयज्ञतपःक्रियाः |
त्वत्प्रसादादवाप्यंते ब्रह्मक्षत्रविशां गणैः || 19 ||

यदहर्ब्रह्मणः प्रोक्तं सहस्रयुगसम्मितं |
तस्य त्वमादिरंतश्च कालज्ञैः परिकीर्तितः || 20 ||

मनूनां मनुपुत्राणां जगतोऽमानवस्य च |
मन्वंतराणां सर्वेषामीश्वराणां त्वमीश्वरः || 21 ||

संहारकाले संप्राप्ते तव क्रोधविनिःसृतः |
संवर्तकाग्निस्त्रैलोक्यं भस्मीकृत्यावतिष्ठते || 22 ||

त्वद्दीधितिसमुत्पन्ना नानावर्णा महाघनाः |
सैरावताः साशनयः कुर्वंत्याभूतसंप्लवं || 23 ||

कृत्वा द्वादशधाऽऽत्मानं द्वादशादित्यतां गतः |
संहृत्यैकार्णवं सर्वं त्वं शोषयसि रश्मिभिः || 24 ||

त्वामिंद्रमाहुस्त्वं रुद्रस्त्वं विष्णुस्त्वं प्रजापतिः |
त्वमग्निस्त्वं मनः सूक्ष्मं प्रभुस्त्वं ब्रह्म शाश्वतं || 25 ||

त्वं हंसः सविता भानुरंशुमाली वृषाकपिः |
विवस्वान् मिहिरः पूषा मित्रो धर्मस्तथैव च || 26 ||

सहस्ररश्मिरादित्यस्तपनस्त्वं गवां पतिः |
मार्तंडोऽर्को रविः सूर्यः शरण्यो दिनकृत्तथा || 27 ||

दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः |
आशुगामी तमोघ्नश्च हरिताश्वच्च कीर्त्यसे || 28 ||

सप्तम्यामथवा षष्ठ्यां भक्त्या पूजां करोति यः |
अनिर्विण्णोऽनहंकारी तं लक्ष्मीर्भजते नरं || 29 ||

न तेषामापदः संति नाधयो व्याधयस्तथा |
ये तवानन्यमनसः कुर्वंत्यर्चनवंदनं || 30 ||

सर्वरोगैर्विरहिताः सर्वपापविवर्जिताः |
त्वद्भावभक्त्याः सुखिनो भवंति चिरजीविनः || 31 ||

त्वं ममापन्नकामस्य सर्वातिथ्यं चिकीर्षतः |
अन्नमन्नपते दातुमभितः श्रद्धयाऽर्हसि || 32 ||

ये च तेऽनुचराः सर्वे पादोपांतं समाश्रिताः |
माठरारुणदंडाद्यास्तांस्तान् वंदेऽशनिक्षुभान् || 33 ||

क्षुभया सहिता मैत्री याश्चान्या भूतमातरः |
ताश्च सर्वा नमस्यामि पातुं मां शरणागतं || 34 ||

इति श्रीमन्महाभारते अरण्यपर्वणि तृतीयोऽध्याये युधिष्ठिरकृत भास्कर स्तुतिः ||